# श्वेतः काकः

**सुधा मूर्तिः**
**अनुवादिका-वरदा वसा**
**अध्यापिका**
**संस्कृत,पालि एवं प्राकृत विभागः,**
**म. स. विश्वविद्यालयः, वटोदरम्**

उमासुन्दरी एका वाचाला स्त्रीरासीत् । सा सदैव जल्पति स्म । तस्यै जल्पनकर्म अतीव रोचते स्म । सा प्रतिवेशिना किं कृतं ? किं खादितम् ? तक्षो मातरं किम् उक्तम् ? इत्यादीनां विषयानां चर्चायां मोदते स्म । तस्याः पतिः शिवसुन्दरः 'साधारणो जन आसीत् । 'अन्येषां विषये चर्चां मा कुरु' इति स तां सूचयति स्म किन्तु सा कदापि तस्य वचनं न शृणोति स्म ।

एकदा शिवसुन्दरो गृहस्य बहिरुपविष्ट आसीत् । स सहसा ऊर्ध्वम् अपश्यत् अवदत् च- 'उमासुन्दरि । पश्य, कीदृशः सुन्दरः काकः अस्माकं बहिर्गृहस्य छदोपरि उपविष्टोऽस्ति...त्वम् अस्मिन् विषये कमपि न वद' ।

उमासुन्दरी तम् असाधारणं काकं बहिर्गृहस्य छदोपरि उपविष्टं दृष्टवती तस्या मनसि प्रश्नो जातः 'कथं शिवसुन्दर आश्चर्यान्वितोऽभवत् ? स मां कथमुक्तवान् यत् त्वं कमपि मा वद ?' किं तस्य कारणमिति सा अचिन्तयत् ।

उमासुन्दरी तं प्रश्नं हृदये धारयितुमसमर्था जाता । सा तं विषयं वेदयितुं तीव्रां व्यग्रताम् अनुभूतवती । अतः सा प्रतिवेशिनीं सत्यभामामवदत् , 'किं त्वम् अस्माकं बहिर्गृहं दृष्टवती? प्रातः एको विशालः काकः श्वेतच्छदोपरि उपविष्ट आसीत् । मया एतादृशो विशालः काकः पूर्वं कदापि न दृष्टः । मम पतिरपि काकमपश्यत् । तं दृष्ट्वा स तु महता आश्चर्येण अवदत् यत् अस्मिन् विषये कमपि न वक्तव्यम् । किन्तु मया अस्य रहस्यं त्वामवश्यं वक्तव्यम् । परन्तु त्वमस्य रहस्यं कमपि न वद' । इत्युक्त्वा उमासुन्दरी गृहं प्रत्यागच्छत् । इदं ज्ञात्वा प्रतिवेशिनी सत्यभामा मध्याह्नभोजनं त्यक्त्वा त्वरितं तस्याः सख्या विमलवत्या गृहमधावत् ।

तदा विमलवती भोजनं कृतवती आसीत् । सा तस्याः स्वर्णकङ्कणानि स्वच्छीकरोति स्म। सत्यभामा तस्याः कर्णाभ्यां मन्दस्वरेण उक्तवती, किं' भवत्या ज्ञातमस्ति अधुना किं चलति? एको विशालः काक उमासुन्दर्या बहिर्गृहस्य छदोपरि उपविष्ट आसीत् । स गरुडसदृशो विशाल आसीत् ।

ताभ्यां वारं वारं प्रयत्नः कृतः तथापि स स्थानच्युतो नाभवत् । कदाचित् काकः तयोर्गृहस्य गुप्तधनविषये जानाति...। किन्तु इमां वार्तां त्वं कमपि मा वद', इत्युक्त्वा सा स्वगृहं प्रत्यागतवती ।

इदं ज्ञात्वा विमलवती भृशमसूयति स्म । तस्या मातामही ताम् एकदा उक्तवती आसीद् यदसाधारणा घटना गुप्तधनविषये सूचयति । विशालकाकस्य उपस्थितिः उमासुन्दर्या गृहे स्थितस्य गुप्तधनस्य सूचकोऽस्ति । सा क्रुध्यति स्म । तस्याः समीपे केवलं द्वे जीर्णे स्वर्णकङ्कणे स्तः किन्तु उमासुन्दर्याः समीपे विपुलनिधिर्वर्तते अधुना । सा पतिं कमलेशमुपगच्छति स्म ।

कमलेशो लेखकोऽस्ति । स कामपि कथां लेखितुं चिन्तामग्न आसीत् । विमलवती तं उक्तवती, 'काल्पनिककथालेखनं त्यजतु । उमासुन्दरीं पश्य । तौ विना परिश्रमं त्वरितमेव धनिकौ जातौ । तयोः समीपे सुवर्णकङ्काणानां विपुलो राशिर्विद्यते'।

इमां वार्तां श्रुत्वा कमलेशोऽपि उदासीनोऽभवत् । सहसा प्रतिवेशिनौ कथं धनिकौ भविष्यतः? स भार्याम् अपृच्छद् यत् सा कथं धनविषये ज्ञातवती ? सा वदति स्म, 'कदाचित् तयोर्बहिर्गृहस्थ छदोपरि एकः श्वेतः काकः उपविष्ट आसीत् । तस्यार्थोः गृहस्याधोभागे विपुलो धनराशिर्वतते ।'

कमलेशः शिवसुन्दराय ईर्ष्यां करोति स्म। तस्य पराभवस्यायम् उत्तमोऽवसरोऽस्तीति स चिन्तयति स्म। स त्वरितमेव स्वस्थानादुत्थाय ग्रामप्रमुखस्य गृहं गतवान्। 'अधुना मया ज्ञातमस्ति यत् शिवसुन्दरस्य गृहस्याधोभागे विपुलो धनराशिर्वर्तते ' इति स ग्रामप्रमुखं' सूचयति स्म ।

तस्मिन् राज्ये नियमोऽयं वर्तते यत् यदि भूमितः कोऽपि निधिः प्राप्यते स राज्ञो भवति न तु गृहस्वामिनः । तदा स प्रमुखः सैनिकैः सह शिवसुन्दरस्य गृहं प्रति गतवान् । 'गृहस्य खननं करणीयमिति राजाज्ञा' इति तमुक्तवान् । तदा शिवसुन्दरः किञ्चिद् वक्तुमिच्छति स्म किन्तु कोऽपि तस्य वचनं न श्रूतवान् । तैर्गृहस्य खननम् आरब्धम् । किन्तु तत्र किमपि न प्राप्तवन्तः ।

कुपितो ग्रामप्रमुखः कमलेशम् आह्यत् तं च अपृच्छत् , धनराशिविषये केन उक्तम् ?' कमलेशः स्वभार्यां विमलवतीं निर्दिशति स्म, सा सत्यभामां निर्दिशति स्म, सत्यभामा उमासुन्दरीं च निर्दिशति स्म । अन्ते उमासुन्दरी स्वदोषं स्वीकरोति स्म यत् सा प्रथमादेव सामान्यां वार्तां महतीं कृत्वा प्रसारितवती आसीत् ।

तद्दीनानन्तरं कोऽपि उमासुन्दर्या वचनं न श्रृणोति स्म । न कोऽपि तया सह वार्तालापमपि करोति स्म । शिवसुन्दरः किञ्चिद् हसित्वा मनसि अचिन्तयत् , उमासुन्दर्या जल्पनकर्मणो मया समुचित उपयोगः कृतः । अनेन मम जीर्णगृहो ध्वस्तः । यदि अहं स्वयं गृहस्य खननम् अकरिष्यम् तर्हि अतीव धनव्ययो अभविष्यत् । अधुना तस्मिन् स्थाने अहमेकस्याः सुन्दरवाटिकाया निर्माणं करिष्यामि, तत्र च तया सह सुखेन उपवेक्ष्यामि । तया सह च सुखपूर्वकं वार्तालापमपि करिष्यामि'।